# सन्धिपरिचयः

प्रस्तुतकर्त्ता
डा. देवदत्त सरोदे
आचार्यः शिक्षाशास्त्रविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
श्री सदाशिव परिसरः, पुरी

# सन्धिः

अक्षरयोः / अक्षराणां संयोगः सन्धिः

# सन्धिः

वर्णानाम् अतिशयितः सन्निधिः सन्धिः । एकस्य वर्णस्य उच्चारणानन्तरमपरस्य वर्णस्य उच्चारणम्, ततः तृतीयस्य, ततः चतुर्थस्य इत्येवं क्रमेण शब्दोच्चारणं भवति । द्वयोः वर्णयोः उच्चारणे अर्धमात्राकालात् अपि अधिककालेन व्यवधानं यथा न भवेत् (द्वयोः वर्णयोः उच्चारणे अर्धमात्राकालः सह्यते इत्यर्थः) तथा उच्चारणमेव सन्धिः । पाणिनिव्याकरणे एष सन्धिः 'संहिता' पदेनाभिधीयते ।

एवं सन्धौ सति कदाचिद् वर्णस्य आदेशादिकं भवति । इत्थम् आदेशादिकम् एव सन्धिकार्यम् इत्युच्यते । इदं च सन्धिकार्यं पदस्य मध्ये पदयोर्मध्ये वा सम्भवेत् ।

# सन्धिः

यथा - १. हरे + ए = हरये। २. इति + अपि = इत्यपि

अत्र आद्ये पदस्य मध्ये, द्वितीये पदयोर्मध्ये सन्धिकार्यं प्रवृत्तम्। लोके तु सन्धिकार्यमित्यर्थे सन्धिरिति व्यवहारः क्रियते।

अतः सन्धिप्रकरणमित्यस्य सन्धिकार्यप्रकरणमित्यर्थः।

यणसन्धिरित्यस्य यण्-रूपसन्धिकार्यमित्यर्थः । इत्थञ्च सन्धिप्रकरणे सन्धिशब्दः सन्धिकार्यपरः इति ज्ञेयम्। सन्धिकार्यम् आदेशादिकं चतुर्धा सम्भवति - १. आदेशरूपेण २. आगमरूपेण ३. लोपरूपेण ४. प्रकृतिभावरूपेण।

# सन्धिः

१. आदेशः - 'योऽभूत्वा भवति सः आदेशः' इति भाष्यकारेण उक्तम्। पूर्वस्थितम् अक्षरं निरस्य नूतनस्य अक्षरस्य उदयः एव आदेशः। अतः एव शत्रुवदादेशः इति वृद्धाः व्यवहरन्ति। अयमादेशः पूर्वस्य स्थाने परस्य वा स्थाने स्यात्, पूर्वपरयोः स्थानेऽपि स्यात्। पूर्वपरयोः स्थाने प्रवर्तमानः आदेशः "एकादेशः' इति शब्देन व्यवह्रियते।

यथा - १. यदि + अपि = यद्यपि। अत्र इकारस्य स्थाने यकारादेशः।

२. गण + ईशः = गणेशः। अत्र पूर्वपरयोः अकारेकारयोः स्थाने (अ + इ) एकाररूपः एकादेशः।

# सन्धिः

२. आगमः- स्थितस्य वर्णस्य पार्श्वे ऽपूर्वतया अपरस्य वर्णस्य उत्पत्तिः आगमः। मित्रवद् आगमः इति फलितार्थः। यथा - पठन् + अस्ति = पठन्नस्ति। अत्र अकारात्पूर्वम् अपूर्वः (नूतनः) अपरो नकारः उत्पन्नः।

३. लोपः - वर्णस्य अदर्शनं लोपः।। यथा - १. उभाव् + अपि = उभा अपि। अत्र वकारस्य लोपः।

४. प्रकृतिभावः - निमित्ते सत्यपि आदेशाभावो विधीयते। सः एव प्रकृतिभावः। यथा - हरी + एतौ = हरी एतौ। अत्र यणो निमित्तस्य सद्भावेऽपि यण् न प्रवृत्तः। यणभावोऽत्रास्ति।

# सन्धिभेदाः

सन्धयस्त्रिविधाः' - १. स्वर(अच् ) सन्धिः २. व्यञ्जन(हल)सन्धिः ३. विसर्गसन्धिश्चेति ।

१.स्वरसन्धिः - स्वरस्य स्थाने आदेशः स्वरसन्धिः ।

यथा -अनु + एषणम् = अन्वेषणम् । अत्र उकारस्य स्थाने आदेशः ।

२.व्यञ्जनसन्धिः - व्यञ्जनस्य स्थाने आदेशः, लोपः, व्यञ्जन-निमित्तकागमश्च व्यञ्जनसन्धिः । यथा –

- जगत् + ईशः = जगदीशः - अत्र तकारस्य स्थाने (दकारः)आदेशः।
- उभाव् + अपि = उभा अपि - अत्र वकारस्य लोपः ।
- पचन् + अस्ति = पचन्नस्ति – अत्र व्यञ्जननिमित्तकः (नकारः)आगमः ।

# सन्धिभेदाः

३. विसर्गसन्धिः - विसर्गस्य स्थाने आदेशः लोपश्च विसर्गसन्धिः ।

यथा –

- बालः + तत्र = बालस्तत्र - अत्र विसर्गस्य स्थाने आदेशः ।
- वृक्षाः + अत्र = वृक्षा अत्र - अत्र विसर्गस्य लोपः ।

प्रकृतिभावः स्वरसन्धौ, स्वादिसन्धौ विसर्गसन्धौ च अन्तर्भावितः अत्र इति ज्ञेयम् ।


सन्धयः
स्वरसन्धिः
व्यञ्जनसन्धिः
विसर्गसन्धिः

# स्वरसन्धिः

- ✓ सवर्णदीर्घसन्धिः
- ✓ गुणसन्धिः
- ✓ वृद्धिसन्धिः
- ✓ पूर्वरूपसन्धिः
- ✓ पररूपसन्धिः
- ✓ यण् सन्धिः
- ✓ यान्तवान्तादेशसन्धिः
- ✓ प्रकृतिभावः

# व्यञ्जनसन्धिः

- श्चुत्वसन्धिः
- ष्टुत्वसन्धिः
- जश्त्वसन्धिः
- चर्त्वसन्धिः
- अनुनासिकासन्धिः
- अनुस्वारसन्धिः
- ङमुडागमसन्धिः
- पूर्णसवर्णसन्धिः
- छत्वसन्धिः
- तुगागमसन्धिः

# विसर्गसन्धिः

- सकारः
- जिह्वामूलीयः उपध्मानीयश्च
- रेफः
- लोपः
- उकारः

# स्वरसन्धिः

# अष्टविधा:स्वरसन्धय:

यण् सन्धि:
यान्तवान्तादेशसन्धि:

एतयो: द्वयो: सन्ध्यो: पूर्वस्य एकस्यैव वर्णस्य स्थाने आदेशो भवति ।

सवर्णदीर्घसन्धि:
गुणसन्धि:
वृद्धिसन्धि:
पूर्वरूपसन्धि:
पररूपसन्धि:

पञ्चस्वप्येतेषु सन्धिषु पूर्वस्य परस्य च स्थाने एकादेशा: भवन्ति ।

प्रकृतिभाव:

अत्र आदेशाभाव:

# सवर्णदीर्घसन्धिः

**सवर्णदीर्घसन्धिः** – ‘अकः सवर्णे दीर्घः’ इत्यनेन सूत्रेण संहिता-विषये 'अक्' प्रत्याहारस्य सवर्णे अचि परे सति पूर्वपरयोः स्थाने दीर्घ-एकादेशः भवति।

# सवर्णदीर्घसन्धिः

अ+अ=
आ+आ=
अ +आ=
आ +अ=
} आ

उ + उ =
ऊ + ऊ =
उ + ऊ =
ऊ + उ =
} ऊ

इ + इ =
ई + ई =
इ + ई =
ई + इ =
} ई

ऋ + ऋ =
ॠ + ॠ =
ऋ + ॠ =
ॠ + ऋ =
} ॠ

# उदाहरणानि

परम + अर्थः =

परम् + [अ + अ] र्थः =

परम् + आ + र्थः =

→ **परमार्थः**

विद्या + आलयः =

विद्य् + [आ + आ] लयः =

विद्य् + आ + लयः =

→ **विद्यालयः**

# उदाहरणानि

देव + आलयः =

देव्+ [अ + आ] लयः =

देव् + आ + लयः =

**देवालयः**

विद्या + अभ्यासः =

विद्य् + [आ + अ] + भ्यासः=

विद्य् + आ + भ्यासः =

**विद्याभ्यासः**

# उदाहरणानि

कवि + इन्द्रः =

कव् + [इ + इ] न्द्रः =

कव् + ई + न्द्रः=

→ कवीन्द्रः

मही + ईशः =

मह् + [ई + ई] शः =

मह् + ई + शः =

→ महीशः

# उदाहरणानि

कवि + ईश्वरः =
कव् + [इ + ई] श्वरः =
कव् + ई + श्वरः =

**कवीश्वरः**

पृथिवी + इन्दुः =
पृथिव् + [ई + इ] न्दुः =
पृथिव् + ई + न्दुः =

**पृथिवीन्दुः**

# उदाहरणानि

भानु + उदय: =

भान् + [उ + उ] दय: =

भान् + ऊ + दय:

→ भानूदय:

वधू + ऊर्मिका =

वध् + [ऊ + ऊ] र्मिका =

वध् + ऊ + र्मिका =

→ वधूर्मिका

# उदाहरणानि

साधु + ऊचुः =
साध् + [उ + ऊ] चुः =
साध् + ऊ + चुः =

साधूचुः

वधू + उत्साहः =
वध् + [ऊ + उ] त्साहः =
वध् + ऊ + त्साहः

वधूत्साहः

# उदाहरणानि

पितृ + ऋणम् =
पित् + [ऋ + ऋ] णम् =
पित् + ॠ + णम् =

पितॄणम्

होतृ + ऌकारः =
होत् + [ऋ + ऌ] कारः =
होत् + ॠ + कारः =

होतॄकारः

# अन्यान्युदाहरणानि

| | |
|---|---|
| अल्प + अपराधः = | दर्भ + आसनम् = |
| मुनि + इन्द्रः = | रस + आस्वादः = |
| श्री + ईशः = | गुरु + उपदेशः = |
| गुरु + ऊधः = | अस्य + अन्यथा = |
| होतृ + ऋकारः = | न + अन्यथा = |
| मधुर + अक्षरम् = | विद्या + आतुरः = |
| दैत्य + अरिः = | दशमी + इति = |
| अस्ति + इदम् = | अद्य + अपि = |

# गुणसन्धिः

**आद्गुणः** - अवर्णाद् अचि परे पूर्वपरयोरेको गुणादेशो भवति

# गुणसन्धिः

अ + इ =
अ + ई =
आ + इ =
आ + ई =
} ए

अ + उ =
अ + ऊ =
आ + उ =
आ + ऊ =
} ओ

अ + ऋ =
अ + ॠ =
आ + ऋ =
आ + ॠ =
} अर्

अ + ऌ =
आ + ऌ =
} अल्

# उदाहरणानि

देव + इन्द्रः =
देव् + [अ + इ] न्द्रः =
देव् + ए न्द्रः =

**देवेन्द्रः**

गण + ईशः =
गण् + [अ + ई] शः =
गण् + ए + शः =

**गणेशः**

# उदाहरणानि

महा + इन्द्रः =

मह् + [आ+ इ] न्द्रः =

मह् + ए + न्द्रः =

} महेन्द्रः

महा + ईशः =

मह् + [आ + ई] शः =

मह् + ए + शः =

} महेशः

# उदाहरणानि

सूर्य + उदयः =
सूर्य् + [अ + उ] दयः =
सूर्य् + ओ + दयः =

→ सूर्योदयः

एक + ऊनविंशतिः =
एक् + [अ + ऊ] नविंशतिः =
एक् + ओ + नविंशतिः

→ एकोनविंशतिः

# उदाहरणानि

महा + उत्सवः =
मह् + [आ + उ] त्सवः =
मह् + ओ + त्सवः =
} महोत्सवः

महा + ऊर्मिः =
मह् + [आ + ऊ] र्मिः =
मह् + ओ र्मिः =
} महोर्मिः

# उदाहरणानि

सप्त + ऋषयः =
सप्त् + [अ + ऋ] षयः =
सप्त् + अर्  + षयः =
} सप्तर्षयः

महा + ऋषिः =
मह् + [आ + ऋ] षिः =
मह् + अर्  + षिः
} महर्षिः

# उदाहरणानि

तव + ऌकारः =
तव् + [अ + ऌ] कारः =
तव् + अल् + कारः =

} तवल्कारः

महा + ऌकारः =
मह् + [आ + ऌ] कारः =
मह् + अल् + कारः =

} महल्कारः

# अन्यान्युदाहरणानि

उप + इन्द्रः =

परम + ईश्वरः =

महा + ईश्वरः =

रमा + ईशः =

गुण + उपेतम् =

सुलभ + उपायः =

सप्त + ऋषयः =

कृष्ण + ऋद्धिः =

परम + उत्कृष्टम् =

राम + इति =

च + इति =

न + उन्नतः =

हित + उपदेशः =

# अन्यान्युदाहरणानि

गङ्गा + उदकम् =

राजा + ऋषिः =

ब्रह्म + ऋषिः =

प्रश्न + उत्तरम् =

पर + उपकारः =

पुरुष + उत्तमः =

धीर + उद्धतः =

जिह्वा + इति =

देव + ऋषिः =

प्राचीना + उक्तिः =

परिचयस्य + उद्देशः =

न + इच्छति =

महा + उद्देशः =

# वृद्धिसन्धिः

**वृद्धिरेचि** - अवर्णादेचि परे पूर्वपरयोरेको वृद्धिरादेशो भवति

# वृद्धिसन्धिः

अ + ए =
अ + ऐ +
आ + ए =
आ + ऐ =

} ऐ

अ + ओ =
अ + औ =
आ + ओ =
आ + औ =

} औ

# उदाहरणानि

एक + एकम् =
एक् + [अ + ए] कम् =
एक् + ऐ + कम् =
→ एकैकम्

तव + ऐश्वर्यम् =
तव् + [अ + ऐ] श्वर्यम् =
तव् + ऐ + श्वर्यम् =
→ तवैश्वर्यम्

# उदाहरणानि

सदा + एव =
सद् + [आ + ए] व =
सद् + ऐ + व =

→ **सदैव**

महा + ऐश्वर्यम् =
मह् + [आ + ऐ] श्वर्यम् =
मह् + ऐ + श्वर्यम् =

→ **महैश्वर्यम्**

# उदाहरणानि

तस्य + ओदनः =
तस्य् + [अ + ओ] दनः =
तस्य् + औ + दनः =
} तस्यौदनः

मम + औषधम् =
मम् + [अ + औ] षधम् =
मम् + औ + षधम् =
} ममौषधम्

# उदाहरणानि

गङ्गा + ओघः =
गङ्ग् + [आ + ओ] घः =
गङ्ग् + औ + घः =
→ गङ्गौघः

महा + औत्सुक्यम् =
मह् + [आ + औ] त्सुक्यम् =
मह् + औ + त्सुक्यम् =
→ महौत्सुक्यम्

# अन्यान्युदाहरणानि

कृष्णा + एकत्वम् =

वन + औषधम् =

अद्य + एव =

न + एव =

तत्र + एव =

तव + औदार्यम् =

मा + एवम् =

यदा + एव =

राष्ट्र + ऐक्यम् =

परम + औदार्यम् =

# अन्यान्युदाहरणानि

देव + ऐश्वर्यम् =

द्वितीया + एकवचनम् =

दिव्य + औषधम् =

कृष्णा + औत्कण्ठ्यम् =

तत्र + एकदा =

तथा + एव =

परम + औचित्यम् =

दृष्ट्वा + एकदा =

देवता + एकात्म्यम् =

रक्ता + ओषधी =

# पूर्वरूपसन्धिः

एङःपदान्तादति - संहितायां पदान्ताद् एङः परतः अति परे (ह्रस्वे अकारे) पूर्वपरयोः स्थाने एकः पूर्वरूपादेशो भवति यथा –

हरे + अव = हरेऽव

भानो + अत्र = भानोऽत्र

ए + अ = ए

ओ + अ = ओ

# उदाहरणानि

अन्ते + अपि =

अन्त् + [ए + अ] पि =

अन्त् + ए + पि =

अन्तेऽपि

सो + अयम् =

स् + [ओ + अ] यम् =

स् + ओ यम् =

सोऽयम्

# अन्यान्युदाहरणानि

| | |
|---|---|
| ते + अत्र = | सो + अवदत् = |
| को + अपि = | गृहे + अहम् = |
| मात्रे + अर्पितम् = | रामो + अहसत् = |
| हरे + अव = | मृगो + अस्ति = |
| गोविन्दो + अतिथिः = | मार्गे + अन्यः = |
| दीर्घे + अहनि = | मे + अन्तिके = |
| सुन्दरे + अम्बरे = | रमे + अम्बिके = |

# परस्परसन्धिः

**एङि पररूपम्** – अवर्णाद् उपसर्गाद् एकारादौ धातौ परे एकारः ओकारादौ धातौ परे ओकारः पूर्वपरयोः स्थाने एकादेशो भवति। यथा

प्र + एजते = प्रेजते

उप + ओषति = उपोषति

**ओमाङोश्च** – अकारान्ताद् आकारान्ताद् वा शब्दाद् ओम् इति शब्दे परे आ(ङ्) इति परे एङि परे ( एकारे अथवा ओकारे ) परे पूर्वपरयोः स्थाने पररूपादेशो भवति। यथा –

शिवाय + ओंम् नमः = शिवायों नमः

शिव + आ + इहि = शिव + एहि = शिवेहि

# पररूपसन्धिः

अ + ए = ए

अ + ओ = ओ

अ + ओम् = ओ(म्)

आ + ओम् = ओ(म्)

अ / आ + आ(ङ्) = ए / ओ

# उदाहरणानि

प्र + एजते =
प्‌ + [अ+ए] + जते =
प्‌ + ए + जते =
} प्रेजते

उप + ओषति =
उप्‌ + [अ + ओ] + षति =
उप्‌ + ओ + षति =
} उपोषति

# उदाहरणानि

शिवाय + ओं नमः =
शिवाय् + [अ + ओं] + नमः =
शिवाय् + ओं +नमः =

} शिवायों नमः

का + ओमिति वदति =
क् + [आ + ओ] + मिति वदति =
क् + ओ + मिति वदति =

} कोमिति वदति

# उदाहरणानि

शिव + आ + इहि =

शिव + [आ + इ] हि =

शिव + ए + हि = (गुणसन्धिः)

शिव + एहि =

शिव् + [अ + ए] हि =

शिव् + ए + हि =

} शिवेहि

# उदाहरणानि

सदा + आ + इहि =

सदा + [आ + इ] हि =

सदा + ए + हि = (गुणः)

सदा + एहि =

सद् + [आ + ए] हि =

सद् + ए + हि =

} सदेहि

# उदाहरणानि

अद्य + आ + ऊढा =

अद्य + [आ + ऊ] ढा =

अद्य + ओ + ढा = (गुणः)

अद्य + ओढा =

अद्य् + [अ + ओ] ढा =

अद्य् + ओ + ढा =

} अद्योढा

# उदाहरणानि

कदा + आ + ऊढा =

कदा + [आ + ऊ] ढा = (गुणः)

कदा + ओ + ढा =

कदा + ओढा =

कद् + [आ + ओ] ढा =

कद् + ओ + ढा =

} कदोढा

# यण् सन्धिः

**इकोयणचि** – इकः ( इ, उ, ऋ, लृ ) स्थाने यण् ( य्, व्, र्, ल् ) स्यात् अचि परे संहितायाम् यथा

प्रति + एकम् = प्रत्येकम्

मधु + अरिः = मध्वरिः

पितृ + इच्छा = पित्रिच्छा

घस्लृ + आदेशः = घस्लादेशः

# यण् सन्धिः

| | |
|---|---|
| इ + (असवर्णस्वरः) = <br> ई + (असवर्णस्वरः) = | य् |
| उ + (असवर्णस्वरः) = <br> ऊ + (असवर्णस्वरः) = | व् |
| ऋ + (असवर्णस्वरः) = <br> ॠ + (असवर्णस्वरः) = | र् |
| ऌ + (असवर्णस्वरः) = → | ल् |

# उदाहरणानि

प्रति + एकम् =
प्रत् + इ + एकम् =
प्रत् + य् + एकम् =

प्रत्येकम्

नदी + अत्र =
नद् + ई + अत्र =
नद् + य् + अत्र =

नद्यत्र

# उदाहरणानि

| | |
|---|---|
| मनु + अन्तरम् =<br>मन् + उ + अन्तरम् =<br>मन् + व् + अन्तरम् = | मन्वन्तरम् |
| वधू + आगमनम् =<br>वध् + ऊ + आगमनम् =<br>वध् + व् + आगमनम् = | वध्वागमनम् |

# उदाहरणानि

<table>
<tr><td>पितृ + इच्छा =</td><td rowspan="3">पित्रिच्छा</td></tr>
<tr><td>पित् + ऋ + इच्छा =</td></tr>
<tr><td>पित् + र् + इच्छा =</td></tr>
<tr><td>घसॢ + आदेशः =</td><td rowspan="3">घस्लादेशः</td></tr>
<tr><td>घस् + ऌ + आदेशः =</td></tr>
<tr><td>घस् + ल् + आदेशः =</td></tr>
</table>

# अन्यान्युदाहरणानि

यदि + अपि =

सुधि + उपास्य: =

धातु + अंश: =

पितृ + अंश्: =

वधू + आसनम् =

इति + आचरन्ति =

इति + आक्षिप्त: =

साधु + इदम् =

स्मरामि + अहम् =

इति + आधुनिक: =

नान्ति + असाध्यम् =

# अन्यान्युदाहरणानि

इति + अपि =

मधु + अरिः =

ऌ + आकृतिः =

जननी + आह =

अति + उत्तमः =

प्रति + अवदत् =

वस्त्राणि + उत्पादयति =

भवतु + अधुना =

पार्वती + अधुना =

व्यसनेषु + असक्तम् =

# यान्तवान्तादेशसन्धिः

**एचोऽयवायावः** - एचः ( ए, ऐ, ओ, औ) इत्येतेभ्यो वर्णेभ्यः परे एकारस्य स्थाने अय्, ऐकारस्य स्थाने आय्, ओकारस्य स्थाने अव्, औकारस्य स्थाने आव् च आदेशो भवति । यथा -

ए + (स्वरः) = अय्

ऐ + (स्वरः) = आय्

ओ + (स्वरः) = अव्

औ + (स्वरः) = आव्

# उदाहरणानि

हरे + ए =
हर् + ए + ए =
हर् + अय् + ए =

→ हरये

हरे + आगच्छ =
हर् + ए + आगच्छ =
हर् + अय् + आगच्छ =

→ हरयागच्छ

# उदाहरणानि

नै + अकः =
न् + ऐ + अकः =
न् + आय् + अकः =

→ नायकः

तस्यै + इदम् =
तस्य् + ऐ + इदम् =
तस्य् + आय् + इदम् =

→ तस्यायिदम्

# उदाहरणानि

विष्णो + ए =
विष्ण् + ओ + ए =
विष्ण् + अव् + ए =

विष्णवे

गुरो + आदेशः =
गुर् + ओ + आदेशः =
गुर् + अव् + आदेशः =

गुरवादेशः

# उदाहरणानि

पौ + अकः =
प् + औ + अकः =
प् + आव् + अकः =

→ पावकः

बालकौ + आगतौ =
बालक् + औ + आगतौ =
बालक् + आव् + आगतौ =

→ बालकावागतौ

# अन्यान्युदाहरणानि

फले + इच्छा =

कटे + उपवेशनम् =

जने + उत्कण्ठा =

वदने + औषधम् =

तस्मै + एतत् =

तस्यै + ओदनम् =

वै + इह =

द्विषावहै + आर्तिम् =

करौ + एतौ =

तौ + एकदा =

बालौ + ओजस्विनौ =

नरौ + उदारौ =

भानौ + इह =

गुरो + उत्साहः =

# प्रकृतिभावः

**ऋत्यकः** - पदान्ताद् अकः ऋति परे प्रकृत्या स्युः, ह्रस्वश्च वा समासेऽपि अयं प्रकृतिभावः

राजा + ऋषिः =

राज + ऋषिः = राज ऋषिः

राजर्षिः (गुणसन्धिः)

वसन्त + ऋतुः = वसन्त ऋतुः

वसन्तर्तुः (गुणसन्धिः)

# उदाहरणानि

दधि + ऋते = दधि ऋते

दध्यृते (यण् सन्धिः)

स्त्री + ऋणम् = स्त्रि ऋणम्

स्त्रि + ऋणम् = स्त्यृणम् (यण् सन्धिः)

# उदाहरणानि

| | |
|---|---|
| गुरु + ऋणम् = | गुरुऋणम् |
| | गुर्वृणम् (यण् सन्धिः) |
| वधू + ऋणम् = | वधुऋणम् |
| वधु + ऋणम् = | वध्वृणम् (यण् सन्धिः) |

# उदाहरणानि

पितृ + ऋणम् = पितृ ऋणम्

पितॄणम् (सवर्णदीर्घ सन्धिः)

# प्रकृतिभावः

| | |
|---|---|
| कवी + एतौ = | कवी एतौ (नात्र यण्) |
| गुरू + इमौ = | गुरू इमौ (नात्र यण्) |
| लते + एते = | लते एते (नात्र यान्तादेशः) |
| पचेते + इमौ = | पचेते इमौ (नात्र यान्तादेशः) |

# उदाहरणानि

अमी + आश्रमाः = अमी आश्रमा (नात्र यण्)

अहो + अत्रभवान् = अहो अत्र भवान् (नात्र पूर्वरूपम्)

आ + एवं नु मन्यसे = आ एवं नु मन्यसे (नात्र वृद्धिः)

# व्यञ्जनसन्धिः

# श्चुत्वसन्धिः

**स्तोः श्चुना श्चुः** - सकारस्य शकारचवर्गाभ्यां योगे सति सकारस्य शकारः, तवर्गस्य शकारचवर्गाभ्यां योगे सति तवर्गस्य स्थाने टवर्गादेशो भवति।

स् + (श् / चवर्गः) = श्

तवर्गः + (श् / चवर्गः) = चवर्गः

चवर्गः + तवर्गः = चवर्गः

# उदाहरणानि

शिशुस् + शेते =

शिशु + श् + शेते = शिशुश्शेते (स् = श्)

मनस् + चञ्चलम् =

मन + श् + चञ्चलम् = मनश्चञ्चलम् (स् = श्)

रामस् + छात्रः =

राम + श् + छात्रः = रामश्छात्रः (स् = श्)

# उदाहरणानि

भगवत् + शक्तिः =
भगव + च् +शक्तिः = भगवच्शक्तिः (त् = च्)

सत् + चित् =
स + च् + चित् = सच्चित् (त् = च्)

सुहृद् + जगाम =
सुहृ + ज् +जगाम = सुहृज्जगाम (द् = ज्)

हे गुणिन् + जानातु =
हे गुणि + ञ् + जानातु = हे गुणिञ्जानातु (न् = ञ्)

# उदाहरणानि

यज् + नः =

यज् + ञ् + अः = यज्ञः (न् = ञ्)

याच् + ना =

याच् + ञ् + आ = याच्ञा (न् = ञ्)

# अन्यान्युदाहरणानि

| | |
|---|---|
| हरिस् + शेते = | तपस् + चर्या = |
| सत् + चिद्रूपम् = | मृत् + शकटिका = |
| गुणिन् + जयः = | उद् + जीवनम् = |
| बृहत् + छत्रम् = | तत् + चिन्त्यम् = |
| अन्यत् + च = | एतद् + ज्ञात्वा = |

# अन्यान्युदाहरणानि

रामस् + च =

तद् + ज्वलति =

उद् + ज्वलम् =

तत् + च =

शार्ङ्गिन् + जय =

कियत् +चिरम् =

सकृत् + चर्वणम् =

भूभृत् + चलति =

बृहत् + छिद्रम् =

प्रतिपत् + चन्द्रः =

# ष्टुत्वसन्धिः

ष्टुना ष्टुः - ष्टुना योगे तवर्गस्य टवर्गः, सकारस्य षकारादेशो भवति ।

स् + (ष / टवर्गः) = ष्

तवर्गः + (टवर्गः) = टवर्गः

(ष) + तवर्गः = टवर्गः

(टवर्गः) + तवर्गः = टवर्गः

# उदाहरणानि

बालस् + षष्ठः =
बाल + ष् + षष्ठः = बालष्षष्ठः (स् = ष्)

टवर्गस् + टादिः =
टवर्ग + ष् + टादिः = टवर्गष्टादिः (स् = ष्)

धनुस् + टङ्कारः =
धनु + ष् + टङ्कारः = धनुष्टङ्कारः (स् = ष्)

# उदाहरणानि

बृहत् + टीका =

बृह + ट् + टीका = बृहट्टीका (त् = ट्)

तद् + डमरुः =

त + ड् + डमरुः = तड्डमरुः (द् = ड्)

एतद् + ढक्का =

एत + ड् + ढक्का = एतड्ढक्का (द् = ड्)

चक्रिन् + ढौकसे =

चक्रि + ण् + ढौकसे = चक्रिण्ढौकसे (न् = ण्)

# उदाहरणानि

आकृष् + तः =

आकृष् + ट् + अः = आकृष्टः (त् = ट्)

इष् + तः =

इष् + ट् + अः = इष्टः

# उदाहरणानि

षण् + नाम् = षण्णाम् (न् ⟶ ण्)

षण् + ण् + आम् =

षण् + नवतिः =

षण् + ण् + अवतिः = षण्णवतिः (न् ⟶ ण्)

षण् + नगर्यः =

षण् + ण् +अगर्यः = षण्णागर्यः (न् ⟶ ण्)

# अन्यान्युदाहरणानि

तत् + टीका =

शरद् + डम्बरः =

उत् + टङ्कनम् =

पक्षिन् + टिट्टिभ ! =

बहद् + डिण्डिमः =

कतमस् + टकारः =

सत् + टिप्पणी =

उद् + डयनम् =

स्याद् + ढक्का =

मरुद् + डिण्डिमः =

बृहत् + टङ्कशाला =

पतद् + डिम्भः =

असकृद् + डयनम् =

भयकृद् + डामरः =

# जश्त्वसन्धिः

झलां जशोऽन्ते – पदान्ते झलां जशः स्युः ।

वर्गीयव्यञ्जनानि + (स्वरः) = जश्

वर्गीयव्यञ्जनानि + [मृदुव्यञ्जनम्(हश्)] = जश्

वर्गीयव्यञ्जनानि = जश्

ष् = ड्

# उदाहरणानि

वाक् + ईशः =

वा + ग् + ईशः = वागीशः (क् = ग्)

अच् + अन्तः =

अ + ज् +अन्तः = अजन्तः (च् = ज्)

मधुलिट् + अस्ति =

मधुलि + ड् + अस्ति = मधुलिडस्ति (ट् = ड्)

जगत् + ईशः =

जग + द् + ईशः = जगदीशः (त् = द्)

सुप् + अन्तम् =

सु + ब् + अन्तम् = सुबन्त (प् = ब्)

# उदाहरणानि

वाक् + व्यवहारः =

वा + ग् + व्यवहारः = वाग्व्यवहारः (क् = ग्)

अच् + वर्णः =

अ + ज् + वर्णः = अज्वर्णः

मधुलिट् + डयते =

मधुलि + ड् + डयते = मधुलिड्डयते (च् = ज्)

महत् + यशः =

मह + द् + यशः = महद्यशः (त् = द्)

सुप् + विभक्तिः =

सु + ब् +विभक्तिः = सुब्विभक्तिः (प् = ब्)

# उदाहरणानि

वाक् / वाग्

अच् / अज्

लिट् / लिड्

मरुत् / मरुद्

ककुप् / ककुब्

षष् + भ्याम् = षड्भ्याम् (ष् = ड्)

ष + ड् + भ्याम् =

# अन्यान्युदाहरणानि

वाक् + देवता =

उत् + गमः =

तत् + यथा =

षष् + आननः =

सत् + गुणः =

स्वर्गात् + अपि =

षष् + दर्शनानि=

तत् + अपि =

# अन्यान्युदाहरणानि

अप् + जम् =

जगत् + गुरुः =

अप् + धिः =

महत् + इदम् =

अस्मात् + वचनात् =

प्राक् + एव =

तावत् + एनम् =

सम्यक् + अभिहितम् =

# चर्त्वसन्धिः

**खरि च** - खरि परे झलां चरः स्युः ।

वर्गीयव्यञ्जनानि + (कर्कशव्यञ्जनानि) = क् च् ट् त् प्

# उदाहरणानि

दिग् + पालः =

दि + क् +पालः = दिक्पालः (ग् = क्)

विराड् + पुरुषः =

विरा + ट् + पुरुषः = विराट्पुरुषः (ड् = ट्)

विपद् + कालः =

विप + त् + कालः = विपत्कालः (द् = क्)

अनुष्टुभ् + छन्दः =

अनुष्टु + प् + छन्दः = अनुष्टुप्छन्दः (भ् = प्)

# अन्यान्युदाहरणानि

अस्मद् + पुत्रः =

सम्पद् + पुत्रः =

उद् + पतति =

तादृग् + कर्म =

विश्वराड् + कुत्र =

तुराषाड् + कुत्र =

परिव्राड् + सङ्गः =

# अन्यान्युदाहरणानि

विपद् + प्रतीकारः =

सम्पद् + कुमारः =

षड् + खाद्यानि =

एतद् + पार्श्वम् =

कामधुग् + खादति =

ऋत्विग् + पार्श्वे =

ककुद् + स्थः =

# अनुनासिकासन्धिः

विकल्पेन –

वर्गीयव्यञ्जनानि + (अनुनासिकः) = अनुनासिकः

नित्यम् –

वर्गीयव्यञ्जनानि + (प्रत्ययानुनासिकः) = अनुनासिकः

# उदाहरणानि

वाग् + मूलम् =

वा + ङ् + मूलम् = वाङ्मूलम् / वाग्मूलम् (ग् = ङ्)

षड् + मयूखाः =

ष + ण् + मयूखाः = षण्मयूखाः / षड्मयूखाः (ड् = ण्)

तद् + नयति =

त + न् + नयति = तन्नयति / तद्नयति (द् = न्)

# उदाहरणानि

चिद् + मयम् =

चि + न् + मयम् = चिन्मयम् (त् = न्)

तद् + मात्रम् =

त + न् + मात्रम् = तन्मात्रम् (द् = न्)

अप् + मयम् =

अ + म् + मयम् = अम्मयम् (प् = म्)

# अन्यान्युदाहरणानि

वाग् + नियमः =

तस्माद् + मद्यम् =

तस्माद् + नागरिकाः =

सम्राड् + मनसि =

जगद् + नाथः =

तद् + मङ्गलम् =

मद् + निवासः =

त्वग् + मोचनम् =

विद्युद् + नगरी =

# अन्यान्युदाहरणानि

षड् + मुखः =

तद् + नयनम् =

यद् + मण्डलम् =

सकृद् + नष्टम् =

जगद् + नियामकः =

मधुलिड् + नमति =

दिग् + मध्ये =

जाग्रत् + नागरिकः =

# अनुस्वारसन्धिः

**मोऽनुस्वारः - मान्तस्य पदस्य अनुस्वारः स्याद् हलि ।**

**म् + (व्यञ्जनानि) =** ं

# उदाहरणानि

रामम् + वन्दे =

राम + ○ + वन्दे = रामं वन्दे (म् = ) ○

गुहायाम् + तपति =

गुहाया + ○ + तपति = गुहायां तपति (म् = ) ○

# अन्यान्युदाहरणानि

हरिम् + श्रयते =

मालायाम् + सूत्रम् =

धर्मम् + चर =

सज्जनम् + आनय =

नगर्याम् + स्थित्वा =

दु:खम् + त्यज =

पुस्तकम् + पश्य =

वीणाम् + वादयति =

# अन्यान्युदाहरणानि

| | |
|---|---|
| वाक्यम् + शृणोतु = | आपणम् + गत्वा = |
| सत्यम् + वद = | सर्वम् + स्थानम् = |
| फलम् + खादित्वा = | पापम् + शान्तम् = |
| वाणीम् + वन्दे = | एवम् + कृत्वा = |

# ङमुडागमसन्धिः

ङमोः ह्रस्वादचि ङमुण् नित्यम् – ह्रस्वात् परो यो ङम् तदन्तं यत्पदं तस्मात्परस्य अचो नित्यं ङमुडागमः स्यात्

(ह्रस्वस्वरपूर्वकाः) ङ् ण् न् + स्वराः = ङ् ण् न्

# उदाहरणानि

प्रत्यङ् + आत्मा =

प्रत्यङ् + ङ् + आत्मा = प्रत्यङ्ङात्मा

सुगण् + ईशः =

सुगण् + ण् + ईशः = सुगण्णीशः

पचन् + अस्ति =

पचन् + न् + अस्ति = पचन्नस्ति

# अन्यान्युदाहरणानि

गच्छन् + अस्ति =

सर्वस्मिन् + अपि =

तिर्यङ् + अत्र =

स्वस्मिन् + एव =

तपस्विन् + एहि =

लिखन् + एव =

हसन् + अत्ति =

शर्मन् + अधीहि =

# अन्यान्युदाहरणानि

तस्मिन् + इति =

उदङ् + इह =

तस्मिन् + एतस्मिन् =

पूर्वस्मिन् + ईश्वरे =

एकस्मिन् + अम्बुजे =

अपरस्मिन् + औषधे =

रुदन् + आयातः =

कस्मिन् + इह =

# पूर्णसवर्णसन्धिः

झयो होऽन्यतरस्याम् (८.४.६२) - झयः परस्य. ह-वर्णस्य स्थाने. पूर्वसवर्णः आदेशः अन्यतरस्याम् - विकल्पेन भवति। वणिग्घसति / वणिग् हसति

(ग् ज् ड् द् ब्) + ह = घ् / झ् / ढ् / ध् / भ्

(उद्) + स् = थ्

# उदाहरणानि

वणिग् + हसति =

वणिग् + घ् + असति= वणिग्घसति / वणिग् हसति

अज् + हलौ =

अज् + झ् + अलौ = अज्झलौ / अज् हलौ

षड् + हयाः =

षड् + ढ् + अयाः = षड्ढयाः / षड्हयाः

तद् + हितम् =

तद् + ध् + इतम् = तद्धितम् / तद्हितम्

अब् + ह्रदौ =

अब् + भ् + रदौ = अब्भ्रदौ / अब् ह्रदौ

# अन्यान्युदाहरणानि

वाग् + हीनः =

अब् + ह्रासः =

जगद् +हित =

तद् + हेतुकम् =

षड् + हर्म्याणि =

प्राग् + हसित्वा =

तद् + हि =

गच्छद् + हूणः =

# अन्यान्युदाहरणानि

महद् + हास्यम् =

सम्राट् + हरिद्राम् =

भवद् + हितरक्षकः =

सुहृद् + हृष्टः =

भ्राजद् + हिरण्यम् =

विड् + हसति =

पतद् + हिमम् =

# उदाहरणानि

उत् + स्थानम् =

उत् + थ् +थानम् = उत्थ्थानम् (उत्थानम्)

उत् + स्तन्भनम् =

उत् + थ् + तम्भनम् = उत्थ्तम्भनम् (उत्तम्भनम्)

# अन्यान्युदाहरणानि

उत् + स्थातव्यम् =

उत् + स्थातुम् =

उत् + स्थानम् =

उत् + स्तम्भितः =

उत् + स्थितिः =

उत् + स्थापनम् =

उत् + स्थाप्य =

उत् + स्तम्भनीयः =

# छत्वसन्धिः

**शश्छोऽटि ८।४।६३.** झयः इति वर्तते, अन्यतरस्याम् इति च। झय उत्तरस्य शकारस्य अटि परतः छकरादेशो भवति अन्यतरस्याम्। वाक् छेते, वाक् शेते।

प्रथमव्यञ्जनम् + श् = छ्

# उदाहरणानि

वाक् + शरः =

वाक् + छ् +अरः = वाक्छरः / वाक् शरः (श् छ्)

तच् + शिवः =

तच् + छ् + इवः = तच्छिवः / तच्शिवः (श् छ्)

मृच् + शकटिकम् =

मृच् + छ् + अकटिकम् = मृच्छकटिकम् / मृच्शकटिकम्

मधुलिट् + शेते =

मधुलिट् + छ् + एते = मधुलिट्छेते / मधुलिट्शेते

# उदाहरणानि

तच् + श्लोकेन =

तच् + छ् + लोकेन = तच्छलोकेन / तच्श्लोकेन

तच् + श्मश्रुः =

तच् + छ् + मश्रुः = तच्छमश्रुः / तच्श्मश्रुः

तच् + श्नाप्रत्ययः =

तच् + छ् + नाप्रत्ययः = तच्छनाप्रत्ययः / तच्श्नाप्रत्ययः

# अन्यान्युदाहरणानि

वाक् + शस्त्रम् =

तत् + शुभम् =

विट् + शङ्करः =

सच् + शीलम् =

चलत् + शुकः =

नश्यच् + शास्त्रम् =

विद्वच् + श्रद्धा =

तच् + श्लाघनम् =

एतच् + श्वस्तनम् =

तच् + श्मशानम् =

# तुगागमसन्धिः

नित्यम् –

ह्रस्वस्वरः + छ = च्

विकल्पेन –

दीर्घपदान्तं + छ = च्

# उदाहरणानि

वृक्ष + छाया =

वृक्ष + च् + छाया = वृक्षच्छाया

शिखरिणी + छन्दः =

शिखरिणी + च् + छन्दः = शिखरिणीच्छन्दः / शिखरिणीछन्दः

# अन्यान्युदाहरणानि

संस्कृत + छात्र =

अक्षर + छन्दस: =

शुभ्र + छवि: =

मानव + छाया =

दीर्घ + छुरिका =

स + छत्र: =

मातृ + छाया =

पदवी + छात्रा: =

मात्रा + छन्द: =

श्वेत + छत्रम् =

कार्य + छलम् =

सूक्ष्म + छिद्रम् =

गृह + छादनम् =

वृक्ष + छेद: =

संस्कृत + छाया =

एतरेय + छान्दोग्ये =

# विसर्गसन्धिः

# विसर्गसन्धिः

**खरवसानयोर्विसर्जनीयः** - ८/३/१५ पदस्य अन्तिम ‘रेफ़स्य अनन्तरं खर् (वर्गाणां 1, 2, श, ष, स) वर्णाः भवन्तु अथवा अवसानं (किमपि न) भवतु चेत् रेफ़स्य विसर्गः (:) भवति । उदा. वृक्षस्तरति, अवसाने – वृक्षः, प्लक्षः ।

**रोः सुपि** ८/३/१६ – रेफ़स्य सुपि परतो विसर्जनीयादेशो भवति ।

उदा.  पयःसु, सर्पिःषु यशःसु ।

**विसर्जनीयस्य सः** ८/३/३४ - अत्र 'खरवसानयोर्विसर्जनीयः (८. ३. १५) इति सूत्रात् खरि इति अनुवर्तते । विसर्जनीयस्य खरि परतः सकारादेशो भवति ।

उदा. वृक्षश्छादयति, वृक्षस्थकारः ।

**शर्परे विसर्जनीयः** ८/३/३५ शर्परे खरि परतो विसर्जनीयस्य विसर्जनीयादेशो भवति ।

उदा. शशः क्षुरम्, वासः क्षौमम् ।

**वा शरि** ८/३/३६ - विसर्जनीयस्य विसर्जनीयादेशो वा भवति  शरि परे ।

उदा.वृक्षः शेते, वृक्षश्शेते ।

# विसर्गसन्धिः

ससजुषो रुः ८।२।६६॥ सकारान्तस्य पदस्य सजुष् इत्येतस्य च रुः भवति ।
उदा. सकारान्तस्य - अग्निरत्र, वायुरत्र। सजुषः - सजूरृषिभिः, सजूर्देवेभिः।

अतो रोरप्लुतादप्लुते ६।१।११३॥ अकारादप्लुतादुत्तरस्य रो रेफस्य उकारानुबन्ध - विशिष्टस्य अकारे ऽप्लुते परत उकारादेशो भवति।
उदा. पुरुष उ अस्ति = पुरुषो अस्ति = पुरुषोऽस्ति

हशि च ६।१।११४॥ हशि च परतः अत उत्तरस्य रोरुकारादेशो भवति।
पुरुषो याति। पुरुषो हसति। पुरुषो ददाति।

# विसर्गसन्धिः

**भोभगोअघोअपूर्वस्य योऽशि** ८।३।१७॥ भोस् , भगोस् , अघोस् , अ (एतत् पूर्वस्य) अश् (अशि), य् (रोः यादेशः). भोस् , भगोस् , अघोस् –स् (भोस् भगोस् अघोस् इति सान्ता निपाताः).देवास् + इह = देवा रु + इह [ससजुषो रुः (८।२।६६)] = देवा य् + इह [देवायिह देवा इह [ लोपः शाकल्यस्य (८।३।१९)]

**लोपः शाकल्यस्य** - ८.३.१९ - वकारयकारयोः पदान्तयोः अवर्णपूर्वयोः लोपो भवति शाकल्यस्य आचार्यस्य मतेन अशि परतः। क आस्ते कयास्ते। काक आस्ते, काकयास्ते

**हलि सर्वेषाम्** ८।३।२२॥ हलि परतः भोभगोअघोअपूर्वस्य यकारस्य पदान्तस्य लोपो भवति सर्वेषाम् आचार्याणां मतेन। भो हसति। भगो हसति। अघो हसति। भो याति।

# विसर्गसन्धिः

रो रि ८।३।१४॥ रेफ़स्य रेफ़े परतः लोपो भवति नीरक्तम्, दूरक्तम्, अग्नी रथः इन्दू रथः, पुना रक्तं वासः

ढ्रलोपे पूर्वस्य दीर्घोऽणः ६।३।१११॥ ढकारस्य, रेफ़स्य लोपे सति पूर्वस्य अणः दीर्घः भवति

एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ६।१॥१३२॥ एतत्तदौ यावककारौ नञ्समासे न वर्तेते तयोर् यः सुशब्दः, कश्च तयोः सुशब्दः? यः तदर्थेन सम्बद्धः, तस्य संहितायां विषये हलि परतो लोपो भवति। एष ददाति। स ददाति। एष भुङ्क्ते। स भुङ्क्ते।

सोऽचि लोपे चेत्पादपूरणम् ६।१।१३४॥ स इत्यस्य सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्य्येत। सेमामविड्ढि प्रभृतिम्। सैष दाशरथी रामः॥

# सकारः

**वा शरि** ८/३/३६ - विसर्जनीयस्य विसर्जनीयादेशो वा भवति  शरि परे।

उदा.वृक्षः शेते, वृक्षश्शेते।

खरि  :-  कखपफ़ान् वर्जयित्वा (कुप्वोः क पौ च ८/३/३८)

**विसर्जनीयस्य सः** ८/३/३४ - अत्र 'खरवसानयोर्विसर्जनीयः (८. ३. १५) इति सूत्रात् खरि इति अनुवर्तते। विसर्जनीयस्य खरि परतः सकारादेशो भवति।  उदा. वृक्षश्छादयति, वृक्षस्थकारः।

विसर्गः + (कर्कशव्यञ्जनानि) =   स्

विसर्गः + (शषस) =   स् / :

# उदाहरणानि

बालः + तत्र =

बाल + स् + तत्र =

बालस्तत्र (: = स्)

रामः + च =

राम + स् + च =

रामस्च (: = स्)

रामश्च

कृष्णः + छात्रः =

कृष्ण + स् + छात्रः =

कृष्णस्छात्रः (: = स्)

डयमानः + टिट्टिभः =

डयमानस्टिट्टिभः (: = स्)

डयमान + स् + टिट्टिभः =

डयमानष्टिट्टिभः

# उदाहरणानि

पयः + शीतलम् =

पय + स् + ईतलम् =

पयस् शीतलम् (: = स्)

पयश्शीतलम्

पयः शीतलम्

श्रीधरः + षष्ठः =

श्रीधर + स् + षष्ठः =

श्रीधरस्षष्ठः (: = स्)

श्रीधरष्षष्ठः

श्रीधरः षष्ठः

भक्तः + सेवते =

भक्त + स् + एवते =

भक्तस्सेवते (: = स्)

भक्तः सेवते

# जिह्वामूलीयः

: + क /ख = ᳵ

# उदाहरणानि

बालः + करोति =

बाल + करोति = बाल करोति / बालः करोति

तरुणः + खनत्ति =

तरुण + खनति = तरुण खनति / तरुणः + खनति

# उपध्मानीयः

: + प / फ = ᳶ

# उदाहरणानि

कृष्णः + पिबति =

कृष्णᳶ + पिबति = कृष्ण ᳶपिबति / कृष्णः पिबति

वृक्षः + फलति =

वृक्ष ᳶ+ फलति = वृक्षᳶ फलति / वृक्षः फलति

# रेफः

(अ आ इत्येतौ विना स्वराः)

+

: + (स्वराः / मृदुव्यञ्जनानि) = र्

अव्ययसन्बन्धी विसर्गः

+

(स्वराः / मृदुव्यञ्जनानि)= र्

ऋकारान्तशब्दस्य सम्बोधनसम्बन्धी विसर्गः

+

(स्वराः + मृदुव्यञ्जनानि) = र्

# उदाहरणानि

मुनिः + इति =
मुनि + र् + इति = मुनिरिति (: = र्)

भानुः + असौ =
भानु + र् + असौ = भानुरसौ (: = र्)

तैः + आगतम् =
तै + र् + आगतम् = तैरागतम् (: = र्)

धेनुः + गच्छति =
धेनु + र् + गच्छति = धेनुर्गच्छति (: = र्)

एतैः + भक्षितम् =
एतै + र् + भक्षितम् = एतैर्भक्षितम् (: = र्)

# उदाहरणानि

पुनः + अत्र =

पुन + र् + अत्र = पुनरत्र (: = र्)

प्रातः + गच्छति =

प्रात + र् + गच्छति = प्रातर्गच्छति (: = र्)

पितः + वन्दे =

पित + र् + वन्दे = पितर्वन्दे

# लोपः

(आ) + : + (स्वराः / मृदुव्यञ्जनानि) = लोपः

(अ) + : + (अकारं विना स्वराः) = लोपः

अकारं विना स्वरः + : + (+र्) = लोपः, पूर्वस्य दीर्घः

# उदाहरणानि

| | |
|---|---|
| बालाः + अत्र = | |
| बाला + अत्र = | बालाअत्र |
| लताः + एधन्ते = | |
| लता + एधन्ते = | लता एधन्ते |
| ताः + गच्छन्ति = | |
| ता + गच्छन्ति = | ता गच्छन्ति = |
| वृद्धाः + यान्ति = | |
| वृद्धा + यान्ति = | वृद्धा यान्ति |

# उदाहरणानि

रामः + आगच्छति =

राम + आगच्छति = राम आगच्छति

कृष्णः + एति =

कृष्ण + एति = कृष्ण एति

# उदाहरणानि

| | |
|---|---|
| एषः + इच्छति = | |
| एष + इच्छति = | एष इच्छति |
| एषः + गच्छति = | |
| एष + गच्छति = | एष गच्छति |
| सः + आगच्छति = | |
| स + आगच्छति = | स आगच्छति |
| सः + तत्र = | |
| स + तत्र = | स तत्र |

# उदाहरणानि

| | |
|---|---|
| कविः + रचयति = | |
| कवि + रचयति = | |
| कवी + रचयति = | कवी रचयति |
| भानुः + राजते = | |
| भानु + राजते = | |
| भानू + राजते = | भानू राजते |
| पुनः + रमते = | |
| पुन + रमते = | |
| पुना + रमते = | पुना रमते |

# उकारः

अ + : + (अ / मृदुव्यञ्जनानि) = उकारः

# उदाहरणानि

रामः + अपि =

राम + उ + अपि (ः = उ) =

रामो + अपि = (गुणः)

राम् + ओ + पि =

रामोऽपि (पूर्वरूपम्)

बालः + हसति =

बाल + उ + हसति = (ः = उ)

बालो + हसति =

बालो हसति (गुणः)

## अन्यान्युदाहरणानि

भूमिः + तोयम् =

ततः + ततः =

तैः + अपि =

पितुः + इच्छा =

गुरोः + भाषणम् =

हरिः + अवदत् =

कपिः + अपि =

कः + चित् =

बालाः + धावन्ति =

देवाः + आगच्छन्ति =

कः + इदानीम् =

# अन्यान्युदाहरणानि

शिवः + वन्द्यः =

गजः + गच्छति =

बालः + हसति =

रामः + जायति =

गुरुः + त्राता =

सः + खादति =

एषः + आसीत् =

सः + अब्रवीत् =

बालः + तिष्ठति =

हे मातः + आगच्छ =

हे भ्रातः + गच्छ =